योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ०२४

अज्ञातलेखकः

निर्वाणप्रकरणस्य पूर्वार्धम्

सर्गः १
सर्गः २
सर्गः ३
सर्गः ४
सर्गः ५
सर्गः ६
सर्गः ७
सर्गः ८
सर्गः ९
सर्गः १०
सर्गः ११
सर्गः १२
सर्गः १३
सर्गः १४
सर्गः १५
सर्गः १६
सर्गः १७
सर्गः १८
सर्गः १९
सर्गः २०
सर्गः २१
सर्गः २२
सर्गः २३
सर्गः २४
सर्गः २५
सर्गः ६५
सर्गः ६६
सर्गः ६७
सर्गः ६८
सर्गः ६९
सर्गः ७०
सर्गः ७१
सर्गः ७२
सर्गः ७३
सर्गः ७४
सर्गः ७५
सर्गः ७६
सर्गः ७७
सर्गः ७८
सर्गः ७९
सर्गः ८०
सर्गः ८१
सर्गः ८२
सर्गः ८३
सर्गः ८४
सर्गः ८५
सर्गः ८६
सर्गः ८७
सर्गः ८८
सर्गः ८९

सर्गः २६
सर्गः २७
सर्गः २८
सर्गः २९
सर्गः ३०
सर्गः ३१
सर्गः ३२
सर्गः ३३
सर्गः ३४
सर्गः ३५
सर्गः ३६
सर्गः ३७
सर्गः ३८
सर्गः ३९
सर्गः ४०
सर्गः ४१
सर्गः ४२
सर्गः ४३
सर्गः ४४
सर्गः ४५
सर्गः ४६
सर्गः ४७
सर्गः ४८
सर्गः ४९
सर्गः ५०
सर्गः ५१
सर्गः ९०
सर्गः ९१
सर्गः ९२
सर्गः ९३
सर्गः ९४
सर्गः ९५
सर्गः ९६
सर्गः ९७
सर्गः ९८
सर्गः ९९
सर्गः १००
सर्गः १०१
सर्गः १०२
सर्गः १०३
सर्गः १०४
सर्गः १०५
सर्गः १०६
सर्गः १०७
सर्गः १०८
सर्गः १०९
सर्गः ११०
सर्गः १११
सर्गः ११२
सर्गः ११३
सर्गः ११४
सर्गः ११५

सर्गः ५२ सर्गः ११६
सर्गः ५३ सर्गः ११७
सर्गः ५४ सर्गः ११८
सर्गः ५५ सर्गः ११९
सर्गः ५६ सर्गः १२०
सर्गः ५७ सर्गः १२१
सर्गः ५८ सर्गः १२२
सर्गः ५९ सर्गः १२३
सर्गः ६० सर्गः १२४
सर्गः ६१ सर्गः १२५
सर्गः ६२ सर्गः १२६
सर्गः ६३ सर्गः १२७
सर्गः ६४ सर्गः १२८

चतुर्विशः सर्गः २४

भुशुण्ड उवाच ।

एकैव केवला दृष्टिर्निरापाया गतभ्रमा ।

विद्यते सर्ववित्त्वेषु सर्वश्रेष्ठा समुन्नता ।। १

आत्मचिन्ता समस्तानां दुःखानामन्तकारिणी ।

चिरसंभृतदुःस्वप्नसंसारभ्रमहारिणी ।। २

निष्कलङ्कमनोमार्गविपुलाङ्गणचारिणी ।

तथा समस्तदुःखानां चिन्तानर्थविनाशिनी ।। ३

ज्योत्स्नयेवान्धकाराणामलमन्तः प्रजायते ।

सा स्वात्मचिन्ता भगवन्सर्वसंकल्पवर्जिता ।। ४

युष्मदादिषु सुप्रापा दुष्प्रापैवास्मदादिषु ।

समस्तकलनातीतं परां कोटिमुपागतम् ।। ५

पदमासादयन्त्येतत्कथं सामान्यबुद्धयः ।

आत्मचिन्ताविलासिन्यास्तस्याः सख्यो महामुने ।। ६

किंचित्साम्यमुपायाता विज्ञानशशिशीतलाः ।

आत्मचिन्तासमानानां विविधानां मुनीश्वर ।। ७

आत्मचिन्तावयस्यानां मध्यादेकतमा मया ।

सर्वदुःखक्षयकरी सर्वसौभाग्यवर्धिनी ।। ८

कारणं जीवितस्येह प्राणचिन्ता समाश्रिता ।

श्रीवसिष्ठ उवाच ।

इत्युक्तवन्तं विहगं भुशुण्डं पुनरप्यहम् ।

जानन्नपीदमव्यग्रः पृष्टवान्क्रीडया मुनिम् ।। ९

सर्वसंशयविच्छेदिन्नत्यन्तचिरजीवित ।

यथार्थम ब्रूहि मे साधो प्राणचिन्ता किमुच्यते ।। 6.1.24.१०

भुशुण्ड उवाच ।

सर्ववेदान्तवेत्तासि सर्वसंशयनाशकः ।

मामेतत्परिहासार्थं मुने पृच्छसि वायसम् ।। ११

अथवा भवतामेव भगवन्परिशिक्षितुम् ।

पुनः प्रत्युत्तराणीदं का मे क्षतिरुपस्थिता ।। १२

भुशुण्डजीवितकरं भुशुण्डस्वात्मलाभदम् ।

शृणु प्राणसमाधानं वक्ष्यमाणमिदं मया ।। १३

पश्येदं भगवन्सर्वं देहगेहं मनोरमम् ।

त्रिप्रकारमहास्थूणं नवद्वारसमावृतम् ।। १४

पुर्यष्टककलत्रेण तन्मात्रस्वजनेन च ।

अहंकारगृहस्थेन सर्वतः परिपालितम् ।। १५

अन्तः पश्यसि सत्कर्णशष्कुलीचन्द्रशालिकम् ।

शिरोरुहाच्छादनवद्विपुलाक्षिगवाक्षकम् ।। १६

आस्यप्रधानसुद्वार भुजपार्श्वोपमन्दिरम् ।

दन्तालिकेसरस्रग्भिर्भूषितद्वारकोटरम् ।। १७

अनारतं रूपरसस्पर्शनद्वारपालवत् ।

संकुलालोकवलितं तारालिन्दकृतस्थिति ।। १८

रक्तमांसवसादिग्धं स्नायुसंततिवेष्टितम् ।

स्थूलास्थिकाष्ठसंबद्धं सुकुडयं सुसमाहितम् ।। १९

इडा च पिङ्गला चास्य देहस्य मुनिनायक ।

सुस्थिते कोमले मध्ये पार्श्वकोष्ठे निमीलिते ।। 6.1.24.२०

पद्मयुग्मत्रयं यन्त्रमस्थिमांसमयं मृदु ।

ऊर्ध्वाधोनालमन्योन्यमिलत्कोमलसद्दलम् ।। २१

सेकेन विकसत्पत्रं सकलाकाशचारिणा ।

चलन्ति तस्य पत्राणि मृदु व्याप्तानि वायुना ।। २२

चलत्सु तेषु पत्रेषु स मरुत्परिवर्धते ।

वाताहते लतापत्रजाले बहिरिवाभितः ।। २३

वृद्धिं नीतः स नाडीषु कृत्वा स्थानमनेकधा ।

ऊर्ध्वाधोवर्तमानासु देहेऽस्मिन्प्रसरत्यथ ।। २४

प्राणापानसमानाद्यैस्ततः स हृदयानिलः ।

संकेतैः प्रोच्यते तज्ज्ञैर्विचित्राचारचेष्टितैः ।। २५

हृत्पद्मयन्त्रत्रितये समस्ताः प्राणशक्तयः ।

ऊर्ध्वाधः प्रसृता देहे चन्द्रबिम्बादिवांशवः ।। २६

यान्त्यायान्ति विकर्षन्ति हरन्ति विहरन्ति च ।

उत्पतन्ति पतन्त्याशु ता एताः प्राणशक्तयः ।। २७

स एष हृत्पद्मगतः प्राण इत्युच्यते बुधैः ।

अस्य काचिन्मुने शक्तिः प्रस्पन्दयति लोचने ।। २८

काचित्स्पर्शमुपादत्ते काचिद्वहति नासया ।

काचिदन्नं जरयति काचिद्वक्ति वचांसि च ।। २९

बहुनात्र किमुक्तेन सर्वमेव शरीरके ।

करोति भगवान्वायुर्यन्त्रेहामिव यान्त्रिकः ।। 6.1.24.३०

तत्रोर्ध्वाधोद्विसंकेतौ प्रसृतावनिलौ मुने ।

प्राणापानाविति ख्यातौ प्रकटौ द्वौ वरानिलौ ।। ३१

तयोरनुसरन्नित्यं मुने गतिमहं स्थितः ।

शीतोष्णवपुषोर्नित्यं नित्यमम्बरपान्थयोः ।। ३२

कलेवरमहायन्त्रवाहयोः श्रमहीनयोः ।

हृदाकाशार्कशशिनोस्त्वग्नीषोमस्वरूपयोः ।। ३३

शरीरपुरपालस्य मनसो रथचक्रयोः ।

अहंकारनृपस्यास्य प्रशस्येष्टतुरङ्गयोः ।। ३४

तयोर्ममानुसरतः प्राणापानाभिधानयोः ।

गतिं शरीरमरुतोराशरीरमरुद्धयोः ।। ३५

जाग्रत्स्वप्नसुषुप्तेषु सदैव समरूपयोः ।

सुषुप्तसंस्थितस्येव ब्रह्मन् गच्छन्ति वासराः ।। ३६

सहस्रविनिकृत्ताङ्गाद्बिसतन्तुलवादपि ।

दुर्लक्ष्या विद्यमानापि गतिः सूक्ष्मतराऽनयोः ।। ३७

अविरतगतयोर्गतिं विदित्वा हृदि मरुतोरनुसृत्य चोदितां ताम् ।

न पुनरिह हि जायते महात्मन्मुदितमनाः पुरुषः प्रणष्टपाशः ।। ३८

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षोपायेषु निर्वाणप्र० पू० भुशुण्डोपाख्याने प्राणविचारणं नाम चतुर्विंशः सर्गः ।। २४ ।।